# Gauryutpattivarnanam

# ગૌર્યુત્પત્તિવર્ણનમ્

## Document Information

Text title : Gauryutpattivarnanam

File name : gauryutpattivarNanam.itx

Category : devii, devI, shivarahasya

Location : doc_devii

Transliterated by : Ruma Dewan

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | IshAkhyaH dvAdashamAMshaH | adhyAyaH 9 gauryutpattiH | 1-68 ||

Latest update : December 28, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 28, 2024

*sanskritdocuments.org*

# ગૌર્યુત્પત્તિવર્ણનમ્

(શિવરહસ્યાન્તર્ગતે ઈશાખ્યે)

સુબ્રહ્મણ્ય ઉવાચ ।

યદા સતી તનું ત્યક્ત્વા યોગેનૈવ સ્વતેજસા ।
સુમુહૂર્તે સુદિવસે મેનાગર્ભે સમાવિશત્ ॥ ૭॥

વિચિત્રશક્તિઃ સા દેવી માયા પશુપતેસ્તદા ।
તત્રૈવ દશમે માસિ શુભલગ્ને ગ્રહૈર્યુતે ॥ ૮॥

પઞ્ચગ્રહેષૂચ્ચગેષુ તદા હિમવતો ગૃહે ।
જજ્ઞે તત્ર મહાદેવી તત્રાસીદુત્સવો મહાન્ ॥ ૯॥

દેવાસ્તત્ર સમાજગ્મુર્વિષ્ણુબ્રહ્માદયઃ સુરાઃ ।
મરુતો વસવઃ સાધ્યા ગન્ધર્વાશ્ચ જગુઃ કલમ્ ॥ ૧૦॥

દેવદુન્દુભયો નેદુઃ પુષ્પવૃષ્ટિરભૂચ્ચ ખાત્ ।
નૃત્યન્ત્યપ્સરસો હૃષ્ટાસ્તદા હિમવતો ગૃહે ॥ ૧૧॥

સોઽપિ વિશ્રાણયામાસ ધનધાન્યં ગવાં ગણમ્ ।
રત્નાનિ ચૈવ વાસાંસિ સ દદૌ શામ્ભવેષુ સઃ ॥ ૧૨॥

મુનયઃ પૂજિતાસ્તેન નારદાદ્યા મહર્ષયઃ ।
વિષ્ણુબ્રહ્માદિવિબુધાન્ ગન્ધપુષ્પૈઃ સમાર્ચયત્ ॥ ૧૩॥

ભક્ષ્યૈર્ભોજ્યૈશ્ચ વાસોભિર્ભૂષણૈર્મુદમાદધત્ ।
જાતકર્માદિકર્માણિ ચકાર સ ગિરીશ્વરઃ ॥ ૧૪॥

યયુઃ સન્તોષમતુલં મુદા તે વિબુધર્ષયઃ ।
મેનયા સહિતાં દૃષ્ટ્વા પાર્વતીં સૂતિકાગૃહે ॥ ૧૫॥

ઉત્તાનશયનાં બાલાં નીલકુન્તલમૂર્ધજામ્ ।
પદ્મપત્રેક્ષણાં ચારુ બિમ્બોષ્ઠીં પદ્મવક્ત્રકામ્ ॥ ૧૬॥

કમ્બુકણ્ઠીં મૃણાલાભબાહુદ્વયવિરાજિતામ્ ।
રક્તાબ્જાભસુહસ્તાં ચ નખચન્દ્રયુતાઙ્ગુલિમ્ ॥ ૧૭॥

બાલારમ્ભાભવૃત્તોરુસ્ફિગ્જઙ્ઘાજઘનાવૃતામ્ ।
ફુલ્લપદ્મભપાદેન ઉત્તાનેન વિરાજિતામ્ ॥ ૧૮॥

દ્વિતીયાસોમસઙ્કાશપાદામ્બુનખાવલિમ્ ।
વ્યાલોલનયનાં બાલાં સર્વભૂષણભૂષિતામ્ ॥ ૧૯॥

રત્નગ્રૈવેયવલયૈર્મુક્તાહારવિરાજિતામ્ ।
ભાલમધ્યાલકાલોલમુક્તાજાલકભૂષિતામ્ ॥ ૨૦॥

તિલકાઢ્યમુખેન્દૂત્થકર્ણાવલિકભૂષિતામ્ ।
રૂષિતાં દિવ્યગન્ધેન દિવ્યપુષ્પૈઃ સુરાર્ચિતામ્ ॥ ૨૨॥

કાઞ્ચીખચિતમધ્યાં ચ ક્ષુદ્રઘણ્ટાલસત્કટિમ્ ।
પાદનૂપુર સંરાવજિત ક્રૌઞ્ચવરસ્વનામ્ ॥ ૨૩॥

દિવ્યવાસોભિરાચ્છન્નાં લોલાન્દોલનવીજિતામ્ ।
દેવપત્ન્યઃ સમાગત્ય શચી સ્વાહા સ્વાધા રમા ॥ ૨૪॥

નીરાજયન્તિ તાં દેવીં દિવ્યમઙ્ગલગાયનૈઃ ।
રક્ષાં રક્ષાકરીં તસ્યા રાક્ષસેભ્યસ્તદા મુદા ॥ ૨૫॥

રાત્રૌ રાત્રૌ પઠન્તિ સ્મ સમવેતા મહર્ષયઃ ।
ગાયન્તિ લલિતં વલ્ગુ મધુરં ગાયનાસ્તદા ॥ ૨૬॥

તદ્ગાનેન ચ સા દેવી વિનિદ્રાતિ દિને દિને ।

દેવસ્ત્રિયઃ ઊચુઃ ।

અયિ જગદમ્બ કદમ્બવનસ્થિત નીપવિદીપિતસૌધ-
યુતામૃતવાર્ધિતરઙ્ગિત વાતસુપોતક વીજિતરત્નગણ-
પ્રભ લોલકડોલવરાસન તાત વિતાન સુવસ્ત્રમણીગણ-
પુષ્પવિરાજિતફુલ્લસુહલ્લક લોલસમાવૃતમઞ્ચવિકર્ષણ
કૂજિતકમ્ ॥ ૨૭॥

ઘનરવરાગસુરાગવિરાગમૃગાવલિ ધૂત સુચામર-
ચન્દ્રક વીજનવીજિતમારુતસાપઘનાવૃત ચન્દ્ર-

સમપ્રભ ધૂતતરાકૃતિ દેવગજાઙ્ગનગીતમિદમ્ ॥ ૨૮॥

વિશ્રુતમણિગણભૂષણકૃતરવ રિઙ્ખણ ઝણઝણ
રવ વર ઘોષણ નિદ્રિત હર્ષિતધર્ષિતમેઘ સુચાતકપોતક-
જાતક ભાવુકકલ્પનશિલ્પનજાતસુસમ્ભ્રમદિગ્ગજ-
સુદ્વિજગર્જન તોષસ્તુતાવિતસર્વસુરાવનપાવન-
સુન્દર નિર્જરદારકૃતસ્તુતિનિદ્રિતપર્વતબાલ-
મબાલતનુપ્રભભાવિતનતજનપોષિતવિશ્રુત ગીતમિદમ્ ॥ ૨૯॥

એવં ગીતેન તાં બાલાં દેવ્યો નિદ્રાપયન્ત્યપિ ।
લાલયન્તિ સ્ત્રિયઃ કાશ્ચિત્સ્નાપયન્તિ મનોરમાઃ ॥ ૩૦॥

ભૂષયન્તિ તથા બાલં તિલકૈર્વેણિમણ્ડનૈઃ ।
પાયયન્તિ તથાન્યાસ્તા ધિક્કૃતામૃતમુત્તમમ્ ॥ ૩૧॥

દિને દિને મહાદેવીં તથા નીરાજયન્ત્યપિ ।
દુકૂલવસનૈશ્ચિત્રૈર્વાસયન્તિ સ્ત્રિયોઽખિલાઃ ॥ ૩૨॥

એવં તત્ર મહાદેવીં પૂજયન્તિ સુરાઙ્ગનાઃ ।
તદા સા વવૃધે બાલા કલા ચાન્દ્રમસીવ સા ॥ ૩૩॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સુબ્રહ્મણ્યપ્રોક્તં ગૌર્યુત્પત્તિવર્ણનં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ઈશાખ્યઃ દ્વાદશમાંશઃ । અધ્યાયઃ ૯ ગૌર્યુત્પત્તિઃ । ૧-૬૮ ॥

- .. shrIshivarahasyam . IshAkhyaH dvAdashamAMshaH . adhyAyaH 9 gauryutpattiH . 1-68 ..

Notes:

Subrahmaṇya સુબ્રહ્મણ્ય narrates (to Jaigīṣavya જૈગીષવ્ય); about the rebirth of Satī સતિ as Pārvatī પાર્વતી with Menā મેના and Himavān હિમવાન્ as Her parents. Being the form of Mahādevī મહાદેવી, She is revered and worshiped apart from being nurtured and taken care of.

Proofread by Ruma Dewan

*Gauryutpattivarnanam*

pdf was typeset on December 28, 2024

Please send corrections to *sanskrit@cheerful.com*